# ॥ श्रीकृष्णकृतम् राधास्तोत्रम् ॥

श्रीकृष्ण उवाच ।
एवमेव प्रियोऽहं ते प्रमोदश्चैव ते मयि ।
सुव्यक्तमद्य कापत्यवचनं ते वरानने ॥ १ ॥
हे कृष्ण त्वं मम प्राणा जीवात्मेति च संततम् ।
ब्रूषे नित्यं तु यत् प्रेम्णा साम्प्रतं तद् गतं द्रुतम् ॥ २ ॥
अस्माकं वचनं सत्यं यद् ब्रवीमिती तद् ध्रुवम् ।
पञ्चप्राणाधिदेवी त्वं राधा प्राणधिकेति मे ॥ ३ ॥
शक्तो न रक्षितुं त्वां च यान्ति प्राणस्त्वया विना ।
विनाधिष्ठातृदेवीं च को वा कुत्र च जीवति ॥ ४ ॥
महाविष्णोश्च माता त्वं मूलप्रकृतिरीश्वरी ।
सगुणा त्वं च कलया निर्गुणा स्वयमेव तु ॥ ५ ॥
ज्योतीरूपा निराकारा भक्तानुग्रहविग्रहा ।
भक्तानां रुचिवैचित्र्यन्नानामूर्तीश्च बिभ्रमती ॥ ६ ॥
महालक्ष्मिश्च वैकुण्ठे भारती च सतां प्रसूः ।
पुण्यक्षेत्रे भारते च सती त्वं पार्वती तथा ॥ ७ ॥
तुलसी पुण्यरूपा च गङ्गा भुवनपावनी ।
ब्रह्मलोके च सावित्री कलया त्वं वसुन्धरा ॥ ८ ॥
गोलोके राधिका त्वं च सर्वगोपालकेश्वरी ।
त्वया विनाहं निर्जीवो ह्यशक्तः सर्वकर्मसु ॥ ९ ॥
शिवः शक्तस्त्वया शक्त्या शवाकारस्त्वया विना ।
वेदकर्ता स्वयं ब्रह्मा वेदमात्रा त्वया सह ॥ १० ॥
नारायणस्त्वया लक्ष्म्या जगत्पाता जगत्पतिः ।
फलं ददाति यज्ञश्च त्वया दक्षिणया सह ॥ ११ ॥
बिभर्ति सृष्टिं शेषश्च त्वां कृत्वा मस्तके भुवम् ।
बिभर्ति गङ्गारूपां त्वां मूर्ध्नि गङ्गाधरः शिवः ॥ १२ ॥
शक्तिमच्च जगत् सर्वं शवरूपं त्वया विना ।
वक्ता सर्वस्त्वया वाण्या सूतो मूकस्त्वया विना ॥ १३ ॥
यथा मृदा घटं कर्तुं कुलालः शक्तिमान् सदा ।
सृष्टिं स्रष्टुं तथाहं च प्रकृत्या च त्वया सह ॥ १४ ॥
त्वया विना जडश्चाहं सर्वत्र च न शक्तिमान् ।
सर्वशक्तिस्वरूपा त्वं समागच्छ ममान्तिकम् ॥ १५ ॥
वह्नौ त्वं दाहिका शक्तिर्नाग्निः शक्तस्त्वया विना ।

शोभास्वरूपा चन्द्रे त्वं त्वां विना न स सुन्दरः ॥१६ ॥
प्रभारूपा हि सूर्ये त्वं विना न स भानुमान् ।
न कामः कामिनीबन्धुस्त्वया रत्या विना प्रिये ॥१७ ॥
इत्येवं स्तवनं कृत्वा तां सम्प्राष जगत्प्रभुः ।
देवा बभूवुः सथीकाः सभार्याः शक्तिसंयुताः ॥१८ ॥
सस्त्रीकं च जगत् सर्वं बभूव् शैलकन्यके ।
गोपीपूर्णश्च गोलोको बभूव तत्प्रसादतः ॥१९ ॥
राजा च जगाम् गोलोकमिति स्तुत्वा हरिप्रियाम् ।
श्रीकृष्णेन कृतं स्तोत्रं राधाया यः पठेन्नरः ॥२० ॥
कृष्णभक्तिं च तद्दास्यं स प्राप्नोति न संसयः ।
स्त्रीविच्छेदेयः शृणोति मासमेकमिदं शुचिः ॥२१ ॥
अचिराल्लभते भार्यां सुशीलां सुन्दरीं सतीं ।
भार्याहीनो भाग्यहीनो वर्षमेकं शृणोति यः ॥२२ ॥
अचिराल्लभते भार्यां सुशीलां सुन्दरीं सतीं ।
पुर मया च त्वं प्राप्ता स्तोत्रेणानेन पार्वति ॥२३ ॥
मृतायां दक्षकन्यायामाज्ञया परमात्मनः ।
स्तोत्रेणानेन सम्प्राप्ता सावित्री ब्रह्मणा पुरा ॥२४ ॥
पुरा दुर्वाससः शापान्निःश्रीके देवतागणे ।
स्तोत्रेणानेन देवैस्तैः सम्प्राप्ता श्रीः सुदुर्लभा ॥२५ ॥
शृणोति वर्षमेकं च पुत्रार्थि लभते सुतम् ।
महाव्याधी रोगमुक्तो भवेत् स्तोत्रप्रसादतः ॥२६ ॥
कार्तिकीपूर्णमायां तु तां सम्पूज्य पठेत्तु यः ।
अचलां श्रियमाप्नोति राजसूयफलं लभेत् ॥२७ ॥
नारी शृणोति चेत् स्तोत्रं स्वामिसौभाग्यसंयुता ।
भक्त्या शृणोति यः स्तोत्रं बन्धनान्मुच्यते ध्रुवम् ॥२८ ॥
नित्यं पठति यो भक्त्या राधां सम्पूज्य भक्तितः ।
स प्रयाति च गोलोकं निर्मुक्तो भवबनात् ॥२९ ॥

इति श्रीब्रह्मवैवर्ते श्रिकृष्णकृष्णकृतं
श्रीराधास्तोत्रं सम्पूर्णम् ।

---

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

---

Please send corrections to sanskrit@cheerful.com
Last updated September 11, 2002